# Shri Saradananda Stotram

# श्रीसारदानन्दस्तोत्रम्

## Document Information

Text title : Shri Saradananda Stotram

File name : sAradAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kumudaranjana Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीसारदानन्दस्तोत्रम्

व्यासकल्पं महात्मानं हिमाद्रिस्निग्ध गम्भीरम् ।
तं नौमि सारदानन्दं धैर्यशीलं क्षमान्वितम् ॥ १॥

सर्वासु नारीरूपेषु "पश्यात्र जगदम्बिकाम्" ।
इत्येवं घोषयन्तं तं मातृमूर्तिदृशं नमः ॥ २॥

कृत्स्नं सङ्घं धारयन्तं वासुकिमिव मूर्धनि ।
प्रकाशयन्तं नित्यं च लीलाग्रन्थं जनेषु वै ॥ ३॥

परिवेश्य तु तल्लीलां जनेषूच्चावचेषु च ।
आनन्दयन्तं भक्तांस्तान् भगवत्प्रेमविग्रहाम् ॥ ४॥

पूरयन्तं च भक्तानां भक्तितृष्णां सुदुर्लभाम् ।
तं वन्दे सारदानन्दं शारदामातृसेवकम् ॥ ५॥

ज्ञानयोगस्य योगस्य भक्तियोगस्य कर्मणाम् ।
मूर्तं विग्रहरूपं तं नमामि श्रेष्ठपूरुषम् ॥ ६॥

करुणासिन्धुरूपं तं सर्वानन्दविवर्धनम् ।
तं नौमि सारदानन्दं स्वामिनं भक्तिभावतः ॥ ७॥

सारदानन्ददेवं ये स्मरन्ति श्रद्धयान्विताः ।
प्राप्नुवन्त्येव ते मुक्तिं करामलकवच्छुभाम् ॥ ८॥

इति अध्यापकपण्डितश्रीकुमुदरञ्जनगोस्वामीतर्कवेदान्ततीर्थविरचितं
"श्रीमत्सारदानन्दस्तोत्रम्" सम्पूर्णम् ।

प्रणाममन्त्रः-
सारदायाः पदाब्जे वै नित्यं यो भ्रमरायते ।
नमोस्तु सारदानन्द स्वामिने ज्ञानदायिने ॥

Proofread by Aruna Narayanan

*Shri Saradananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*